रजतजयन्ती ग्रन्थमाला–६

# शब्दलक्षणप्रामाण्यविमर्शः



एन्० एस्० रामानुजताताचार्यः

राष्ट्रिय-संस्कृत-संस्थानम्

# विषयनुक्रमणिका


| विषयः | पृष्ठसंख्या |
|---|---|
| **शब्दलक्षणविचारः** | **१-१७** |
| न्यायसूत्रानुसारेण शब्दलक्षणम् | १ |
| न्यायमञ्जर्युक्तं शब्दलक्षणम् | ३ |
| उपदेशशब्दार्थविचारः | ३ |
| न्यायभूषणोक्तं शब्दलक्षणम् | ५ |
| परिशुद्धौ भूषणोक्तलक्षणदूषणम् | ६ |
| मण्युक्तं शब्दप्रमाणलक्षणम् | ७ |
| तर्कसंग्रहतद्व्याख्यानेषु शब्दलक्षणम् | १० |
| शब्दशक्तिप्रकाशिकोक्तं शब्दलक्षणम् | ११ |
| मीमांसाशास्त्रोक्तं शब्दप्रमाणलक्षणम् | १२ |
| वेदान्तपरिभाषोक्तं शब्दप्रमाणलक्षणम् | १३ |
| द्वैतवाद्युक्तं शब्दलक्षणम् | १३ |
| न्यायपरिशुद्ध्युक्तं शब्दलक्षणम् | १४ |
| सांख्यदर्शनोक्तं शब्दलक्षणम् | १४ |
| नागेशोक्तं शब्दप्रमाणलक्षणम् | १५ |
| खण्डनखण्डखाद्योक्तदूषणपरामर्शः | १५ |
| चित्सुखीयदूषणानुवादः | १६ |
| **शब्दप्रामाण्यविचारः—** | **१८-९४** |
| चार्वाकमतं तन्निरासश्च | १८ |
| शब्दखण्डमणौ चार्वाकनिरासः | १९ |

नाद्यः, शैलज्वलनयोरिव शब्दार्थयोः धर्मधर्मिभाव विरहात्। न चार्थविषयकत्वाच्छब्दस्य अर्थविशिष्टत्वमुच्यत इति वाच्यम्। निर्विषयकस्य शब्दस्यार्थप्रतीतिजननमन्तरेण अर्थविषयकत्वानुपपत्तेः। प्रतीतौ तु सिद्धायां किं तद्विषयत्वद्वारकतद्धर्मत्वेन ? यदि तु प्रतीतिविषयत्वमूला तद्धर्मत्वसिद्धिः तद्धर्मत्वमूला अर्थप्रतीतिः अर्थप्रतीतिमूलं च तद्विषयत्वम् तदा अन्योन्याश्रयः चक्रकं वा। तस्मान्नार्थविशिष्टः शब्दः साध्यः।

न द्वितीयः, अर्थप्रत्यायनशक्तिसिद्ध्यर्थं शब्दप्रयोगाभावात्।

**न शक्तिसिद्धये शब्दः कथ्यते श्रूयतेऽपि वा।**
**अर्थगत्यर्थमेवामुं शृण्वन्ति च वदन्ति च॥**

नाप्यर्थप्रतीतिविशिष्टतया शब्दः साध्य इति तृतीयः पक्षः, सिद्ध्यसिद्धिविकल्पानुपपत्तेः। अर्थप्रतीतौ सिद्धायामनुमानवैयर्थ्यम्। असिद्धायां तस्यां तद्विशिष्टता न साध्या। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्।

ननु धूमेनाग्निविशिष्टत्वसाधनेऽपि विकल्पोऽयं तुल्य इति चेत् — न हि अग्निवैशिष्टयं धूमे जन्यजनकभावसम्बन्धेन। किं तु व्याप्यव्यापकभावेन। तादृशं च लिङ्गं गमकमिति नान्योन्याश्रयस्य न वा सिद्ध्यसिद्धिविकल्पस्य प्रसक्तिः। शब्दस्तु अर्थप्रतीतेर्जनक इति जन्यया अर्थप्रतीत्या वैशिष्ट्यं शब्दे साध्यते चेत् पूर्वोक्तिविकल्पावसरः। अतो विषयभेदान्न शब्दोऽनुमानम्।

सामग्रीभेदात् खल्वपि न शब्दोऽनुमानम्। पक्षसत्त्वसपक्षसत्त्वादिरूपसापेक्षमनुमानम्, शब्दे तु न तानि रूपाणि सन्ति न वा अपेक्षितानि।

अन्वयव्यतिरेकावपि शब्दार्थयोर्दुरुपपादौ, देशे काले च शब्दार्थयोरनुगमाभावात् (साहचर्यभावात्)। न हि यत्र देशे शब्दः तत्रार्थः। कर्णदेशे हि शब्दमुपलभामहे, भूमावर्थम्। नापि यत्र काले शब्दः तत्रार्थः, इदानीं युधिष्ठिररूपार्थाभावेऽपि युधिष्ठिरशब्दसद्भवात्।

अथ शब्दार्थयोः अन्वयाभावेऽपि (साहचर्याभावेऽपि) शब्दार्थविषयकज्ञानयोः गृह्यत इति चेत् — तत्र वक्तव्यम्। किमर्थबुद्धावुत्पन्नायामन्वयो गृह्यते अनुत्पन्नायां वा ? अनुत्पन्नायां तावद् बुद्धिस्वरूपासत्त्वात् कुतोऽन्वयग्रहणम्? उत्पन्नायां त्वर्थबुद्धो किमन्वयग्रहणेनेति अन्वयग्रहणस्य नैष्फल्यम्।




# राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)